# Shri Nataraja Ashtottarashatanamavali

# श्रीनटराजाष्टोत्तरशतनामावलिः

## Document Information

Text title : Shrimat Natarajashtottarashatanamavali

File name : naTarAjAShTottarashatanAmAvalI.itx

Category : aShTottarashatanAmAvalI, shiva

Location : doc_shiva

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar, PSA Easwaran

Source : chidambarakalpa

Latest update : November 2, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# श्रीनटराजाष्टोत्तरशतनामावलिः

श्री आनन्दनटराजाष्टोत्तरशतनामावलिः

श्रीनटराजध्यानं

ध्यायेत्कोटिरविप्रभं त्रिनयनं शीतांशुगङ्गाधरं
दक्षाङ्घ्रिस्थितवामकुञ्चितपदं शार्दूलचर्माम्बरम् ।
वह्निं डोलकराभयं डमरुकं वामे शिवां श्यामलां
कह्लारां जपसृक्षुकां कटिकरां देवीं सभेशं भजे ॥

ॐ कृपासमुद्रं सुमुखं त्रिनेत्रं जटाधरं पार्वतिवामभागम् ।
सदाशिवं रुद्रमनन्तरूपं चिदम्बरेशं हृदि भावयामि ॥

अथ श्रीनटराजाष्टोत्तरशतनामावलिः ।

ॐ श्रीचिदम्बरेश्वराय नमः ।
ॐ शम्भवे नमः ।
ॐ नटेशाय नमः ।
ॐ नटनप्रियाय नमः ।
ॐ अपस्मारहाराय नमः ।
ॐ हंसाय नमः ।
ॐ नृत्तराजाय नमः ।
ॐ सभापतये नमः ।
ॐ पुण्डरीकपुराधीशाय नमः ।
ॐ श्रीमत् हेमसभेशाय नमः । १०
ॐ शिवाय नमः ।
ॐ चिदम्बरमनवे नमः ।
ॐ मन्त्रमूर्तये नमः ।
ॐ हरिप्रियाय नमः ।
ॐ द्वादशान्तस्थिताय नमः ।
ॐ नृत्ताय नमः ।

ॐ नृत्तमूर्तये नमः ।
ॐ परात्पराय नमः ।
ॐ परानन्दाय नमः ।
ॐ परंज्योतिषे नमः । २०
ॐ आनन्दाय नमः ।
ॐ विबुधेश्वराय नमः ।
ॐ परप्रकाशाय नमः ।
ॐ नृत्ताङ्गाय नमः ।
ॐ नृत्तपादाय नमः ।
ॐ त्रिलोचनाय नमः ।
ॐ व्याघ्रपादप्रियाय नमः ।
ॐ मन्त्रराजाय नमः ।
ॐ तिल्ववनेश्वराय नमः ।
ॐ हराय नमः । ३०
ॐ रत्नसभानाथाय नमः ।
ॐ पतञ्जलिवरप्रदाय नमः ।
ॐ मन्त्रविग्रहाय नमः ।
ॐ ॐकाराय नमः ।
ॐ शङ्कराय नमः ।
ॐ चन्द्रशेखराय नमः ।
ॐ नीलकण्ठाय नमः ।
ॐ ललाटाक्षाय नमः ।
ॐ वह्निहस्ताय नमः ।
ॐ महेश्वराय नमः । ४०
ॐ आनन्दताण्डवाय नमः ।
ॐ श्वेताय नमः ।
ॐ गङ्गाधराय नमः ।
ॐ जटाधराय नमः ।
ॐ चक्रेशाय नमः ।
ॐ कुञ्चितपादाय नमः ।
ॐ श्रीचक्राङ्गाय नमः ।
ॐ अभयप्रदाय नमः ।

ॐ मणिनूपुरपादाब्जाय नमः ।
ॐ त्रिपुरावल्लभेश्वराय नमः । ५०
ॐ बीजहस्ताय नमः ।
ॐ चक्रनाथाय नमः ।
ॐ बिन्दुत्रिकोणवासकाय नमः ।
ॐ पाञ्चभौतिकदेहाङ्काय नमः ।
ॐ परमानन्दताण्डवाय नमः ।
ॐ भुजङ्गभूषणाय नमः ।
ॐ मनोहरायपञ्चदशाक्षराय नमः ।
ॐ विश्वेश्वराय नमः ।
ॐ विरूपाक्षाय नमः ।
ॐ विश्वातीताय नमः । ६०
ॐ जगद्गुरवे नमः ।
ॐ त्रिचत्वारिंशद्कोणाङ्गाय नमः ।
ॐ प्रभाचक्रेश्वराय नमः ।
ॐ प्रभवे नमः ।
ॐ नवावरणचक्रेश्वराय नमः ।
ॐ नवचक्रेश्वरीप्रियाय नमः ।
ॐ नाट्येश्वराय नमः ।
ॐ सभानथाय नमः ।
ॐ सिंहवर्माप्रपूजिताय नमः ।
ॐ भीमाय नमः । ७०
ॐ क्लींकारनायकाय नमः ।
ॐ ऐंकाररुद्राय नमः ।
ॐ त्रिशिवाय नमः ।
ॐ तत्त्वाधीशाय नमः ।
ॐ निरञ्जनाय नमः ।
ॐ रामाय नमः ।
ॐ अनन्ताय नमः ।
ॐ तत्त्व मूर्तये नमः ।
ॐ रुद्राय नमः ।
ॐ कालान्तकाय नमः । ८०

ॐ अव्ययाय नमः ।
ॐ क्ष्मर्यं ॐकारशम्भवे नमः ।
ॐ अव्यक्ताय नमः ।
ॐ त्रिगुणाय नमः ।
ॐ चित्प्रकाशाय नमः ।
ॐ सौंकारसोमाय नमः ।
ॐ तत्त्वज्ञाय नमः ।
ॐ अघोराय नमः ।
ॐ दक्षाध्वरान्तकाय नमः ।
ॐ कामारये नमः । ९०
ॐ गजसंहर्त्रे नमः ।
ॐ वीरभद्राय नमः ।
ॐ व्याघ्रचर्माम्बरधराय नमः ।
ॐ सदाशिवाय नमः ।
ॐ भिक्षाटनाय नमः ।
ॐ कृच्छ्रगतप्रियाय नमः ।
ॐ कङ्कालभैरवाय नमः ।
ॐ नृसिंहगर्वहरणाय नमः ।
ॐ भद्रकालीमदान्तकाय नमः ।
ॐ निर्विकल्पाय नमः । १००
ॐ निराकाराय नमः ।
ॐ निर्मलाङ्गाय नमः ।
ॐ निरामयाय नमः ।
ॐ ब्रह्मविष्णुप्रियाय नमः ।
ॐ आनन्दनटेशाय नमः ।
ॐ भक्तवत्सलाय नमः ।
ॐ श्रीमत् तत्परसभानाथाय नमः ।
ॐ शिवकामीमनोहराय नमः । १०८
ॐ चिदेकरससम्पूर्ण श्रीशिवाय श्रीमहेश्वराय नमः ।
इति श्रीचिदम्बरकल्पस्योक्त श्रीनटराजाष्टोत्तरशतनामावलिः समाप्ता ।

Encoded by Shree Devi Kumar

Proofread by Shree, NA, PSA Easwaran

*Shri Nataraja Ashtottarashatanamavali*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*